मुक्तस्वाध्यायपीठम्
केन्द्रीयसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन स्थापितः भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः)

Mukta Swadhyaya Peetham
(Institute of Distance Education)
Central Sanskrit University
Established by an Act of Parliament
Under Ministry of Education, Govt. of India

CSU/MSP/Training Programme/90/General/12/2024-2025/131 दिनाङ्कः 20/04/2024

सेवायाम्,

निदेशकः
मुक्तस्वाध्यायपीठस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रम्,
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीराजीवगान्धीपरिसरः, शृङ्गेरी-577 139, चिकमङ्गलूरु (कर्णाटकम्)।

**विषयः - प्रशिक्षणकार्यक्रमसन्दर्भे।**

महोदयः!

मुक्तस्वाध्यायपीठे नामाङ्कितानां छात्राणाम् अध्यापनं प्रारब्धं वर्तते। विश्वविद्यालयानुदानायोगस्य नियमानुसारेण आनलाईनछात्रेभ्यः चतुरायात्मकाध्यापनसौकर्यं प्रदेयम्। तदन्तर्गतं प्रतिविषयं दृश्यश्रव्यपाठाः निर्मेयाः। अत्र कार्यरताः अध्यापकाः शैक्षिकसदस्याः च सीमितसंसाधनैः स्वकीयक्षमतानुगुणं शिक्षणं कुर्वन्तः सन्ति। दृश्यश्रव्यपाठनिर्माणदृष्ट्या तेषां तन्त्रज्ञानसंवर्धनार्थं कौशलविकाशाय च प्रशिक्षणम् अपेक्षितम्।

दूरस्थशिक्षाक्षेत्रे मणिपालविश्वविद्यालयस्य महतीप्रतिष्ठा विद्यते। दृश्यश्रव्यपाठसामग्रीनिर्माणदृष्ट्या अपि तत्रत्यानां महान् अनुभवः वर्तते। तस्मात् तेषां साहाय्येन मुक्तस्वाध्यायपीठे कार्यरतानां सदस्यानां प्रशिक्षणं विधातुं तत्रत्यदूरस्थशिक्षाप्रमुखेन आचार्यमनोजकुमारनागसम्पिगेमहोदयेन सह वार्ता कृता। सः मणिपालस्थे तेषां संस्थाने अस्मदीयानां प्रशिक्षणकार्यक्रमम् अङ्गयकरोत्।

कार्यक्रमोऽयं भागद्वये आयोजयितुं शक्यते। तत्रादौ 29 अप्रैलतः 01 मई पर्यन्तं मणिपाले तदनु 02 मईतः 03 मई 2024 पर्यन्तं शृङ्गेरीस्थे शैक्षिकविकासकेन्द्रे प्रशिक्षणं भवितुमर्हति। अस्य कार्यक्रमस्य आयोजनम् आन्तरिक-गुणवत्ता-आश्वासन-केन्द्रद्वारा (CIQA) भवेत्।

अस्मिन् कार्यक्रमे मुक्तस्वापीठस्य सर्वे शैक्षिकसदस्याः भागं स्वीकुर्युः। आचार्यनागसम्पिगेमहोदयेन सह सम्पर्कं विधाय व्ययविवरणं प्राप्य कार्यं प्रवर्तनीयम्। नियमानुसारेण प्रशिक्षकेभ्यः प्रतिभागिभ्यश्च आवासभोजनयात्रादिव्ययश्च प्रदातुं शक्यते।

एतदर्थं प्रशिक्षणे प्रतिभागिभ्यः विश्वविद्यालयनियमानुसारं मार्गव्ययः प्रदास्यते। सर्वेषां कृते आवास-भोजनव्यवस्थादिकम् मणिपालविश्वविद्यालये शैक्षिकविकासकेन्द्रे च भविष्यति। एतदर्थं शैक्षिकविकासकेन्द्रात् व्ययः कर्तुं शक्यते।

सादरम्,

भवदीयः

(प्रो. रत्नमोहनझाः)
निदेशकः

# केन्द्रीयसंस्कृतविश्वविद्यालयः

## मुक्तस्वाध्यायपीठम्

## शैक्षिकविकासकेन्द्रम्,श्रृङ्गेरी

### मुक्तस्वाध्यायपीठस्य ई-सामग्रीनिर्माणादिविषये क्षमतावर्धनाय विकासकार्यशालायाः प्रतिवेदनम् ।

29-04-2024 तः 01-04-2024 पर्यन्तं मणिपाले MAHE इत्यत्र दिनत्रयम् ई-सामग्रीनिर्माणादिविषये क्षमतावर्धनाय विकासकार्यशाला आयोजिता । 28-04-2024 सायम् मणिपाले भागग्राहिणां प्राप्तिः अभवत् । कार्यक्रमोऽयं केन्द्रीयसंस्कृतविश्वविद्यालयस्य सम्मान्य-कुलपतिमहोदयस्य मार्गदर्शने, MAHE संस्थायाः निदेशकप्रभृतीनां प्रशिक्षकत्वे, मुक्तस्वाध्यायपीठनिदेशकस्य समुपस्थितौ समारब्धः ।

श्रीमान् विश्वजित् सिंहः, गौरवश्च इत्येतौ लौकिकमङ्गलाचरणम् अकुरुताम् ।

डा. मनोजकुमारनागसम्पिगे महोदयः (निदेशकः, आन्तर्जालिकशिक्षा-निदेशनालयः, मणिपाल-उच्चशिक्षण-अकादमी) स्वागतं प्रास्ताविकं च वचः अवदत् ।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतेः आचार्यस्य श्रीनिवासवरखेडीवर्यस्य आध्यक्ष्ये अस्याः कार्यशालायाः उद्घाटनसत्रं 29-04-2024 दिनाङ्के पूर्वाह्णे सम्पन्नम् ।

अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण गिरिधर किणि वर्यः समागतः । द्वापरयुगे कृष्णः साक्षात् भगवद्गीतां अर्जुनाय बोधयाञ्चकार । अपि च तस्मिन्नेव समये सञ्जयः धृतराष्ट्रम् उवाच । अत्र द्वितीयः यः मार्गः आश्रितो वर्तते तस्मिन्नेव मार्गे वयमपि वर्तामहे इत्यादिविषयं महोदयः न्यरूपयत्। ततः मुक्तस्वाध्यायपीठस्य निदेशकः प्रो.रत्नमोहन झा वर्यः 'ज्ञानस्य उपयोगितां, तन्त्रज्ञानस्य उपयोगेन अध्यापनं सुकरं भवति, मणिपालमार्गदर्शने ज्ञानतन्त्रज्ञानयोः समन्वयः भवति' इत्यादिविषयम् उदबोधयत् । मुक्तस्वाध्यायपीठस्य संयुक्तनिदेशकः श्री वेङ्कटेशमूर्तिवर्यः ' MAHE & CSU द्वारा आयोजितः एषः कश्चन अपूर्वः कार्यक्रमः वर्तते, अस्य सदुपयोगः प्राप्तव्यः' इति

प्राबोधयत्। MAHE संयुक्तनिदेशिका अरुणा महोदया कार्यक्रमस्य सञ्चालनम् अकरोत् । द्वितीयसत्रे डा. मनोजकुमारनागसम्पिगे महोदयः अध्यापकान् उद्दिश्य ई-पाठ्यसामग्रीनिर्माणकौशलविषयः प्रबोधयत्।

तृतीयसत्रे डा. स्मिता महोदयया Table Of Content (TOC), Story board creation, PPT Standardization, अध्येतॄणां मूल्याकलनं, अध्येतॄणाम् अभ्युपगमः इत्यादिविषयाः बोधिताः । ततः Recording Studio अपि प्रदर्शितः । ततः चतुर्थसत्रे अपराह्णे TOC, PPT निर्माणम् च कृतम् ।

30-04-2024 दिनाङ्के द्वितीयदिने चतुर्थसत्रे video निमित्तं recording आरब्धम् । ई-सामग्रीनिर्माणविषयिणी परिचर्चा सञ्जाता । पञ्चमसत्रे, षष्ठसत्रे, सप्तमसत्रे च ई-सामग्रीनिर्माणविषयिणी परिचर्चा, प्रायोगिकं प्रशिक्षणञ्च प्राप्तम् । आदिनं पञ्चदशाधिक-अध्यापकानां Video recording कार्यं सम्पन्नम् । सायं सागरतीरं गत्वा ततः भगवतः उडुपी-श्रीकृष्णस्य दर्शनं प्राप्तवन्तः । तत्रैव श्रीराघवेन्द्रमठे प्रसादं च स्वीकृतवन्तः ।

01-05-2024 दिनाङ्के तृतीयदिने अष्टमसत्रे अध्यापकानां video चित्रीकरणं दृष्ट्वा विमर्शः अभवत् । डा. मनोजकुमारनागसम्पिगे महोदयः छात्राणां कृते Quiz, e-content इत्यादि निर्माणविषयं प्रबोधयत् ।

ततः नवमसत्रे मणिपालसंस्थायां सम्पूर्तिकार्यक्रमः सम्पन्नः । सभायां डा. मनोजकुमारनागसम्पिगे वर्यः, प्रो.रत्नमोहन झा वर्यः, श्री वेङ्कटेशमूर्तिवर्यश्च उपस्थिताः । शैलजा महोदया, अनन्तकृष्णमहोदयः इत्येवमादयः स्वाभिप्रायम् उक्तवन्तः । ततः MAHE Experience Theatre दृष्ट्वा ततः प्रस्थिताः । श्रृङ्गगिरि-गमनमार्गे Heritage Village दृष्ट्वा तत्रत्यवास्तुशास्त्रनिबद्धभवनानि अक्षिसात्कृत्य रात्रौ श्रृङ्गगिरिम् आगतवन्तः ।

02-05-2024 दिनाङ्के चतुर्थदिने श्रृङ्गगिरौ दशमसत्रे परिसरस्य निदेशकाः प्रो.हंसधर झा वर्याः, मुक्तस्वाध्यायपीठस्य नेदेशकाः प्रो. रत्नमोहन झा वर्याः, श्री कृ. वेङ्कटेशमूर्तिवर्याः सभायाम्

उपस्थिताः । दशमे, एकादशे, द्वादशे, त्रयोदशे च सत्रे Big Blue Button द्वारा मुक्तस्वाध्यायपीठस्य अध्यापकाः Live कक्ष्यां स्वीकृतवन्तः ।

सायं श्रीमठं गत्वा श्रीचरणानाम् अनुग्रहं प्राप्तवन्तः ।

03-05-2024 दिनाङ्के पञ्चमदिने चतुर्दशे, पञ्चदशे च सत्रे अध्यापकैः स्वीयपाठयोजनाप्रस्तुतिः कृता। षोडशे सत्रे कक्ष्यायां पाठितानाम् अशानां विमर्शः अभवत् ।

सायं हरिहरपुरमठं गतवन्तः । तत्र सप्तदशं सत्रे कार्यशालायाः अङ्गत्वेन प्रबोधिनी-गुरुकुलं दृष्ट्वा तत्रत्य अध्यपकैः साकं मिलतवन्तः । ततः तुङ्गानद्यां स्नाताः । ततश्च भगवतः लक्ष्मीनृसिंहस्य दर्शनं प्राप्तवन्तः । ततःपरं गुरूणां श्री स्वयम्प्रकाश-सच्चिदानन्दसरस्वती महास्वामिनाम् आशीभिः अनुग्रहीताः ।

04-05-2024 नवदशे, विंशे च सत्रे कक्ष्यायां पाठितानाम् अशानां विमर्शः अभवत् । केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतेः आचार्यस्य श्रीनिवासवरखेडीवर्यस्य आध्यक्ष्ये अस्याः कार्यशालायाः सम्पूर्तिसत्रम् 04-05-2024 दिनाङ्के पूर्वाह्ने सम्पन्नम् । तदनु सायम् उपसंहाररूपेण चर्चा सञ्जाता ।